# Vritta Kusumarpanam

# વૃત્તકુસુમાર્પણમ્

## Document Information

Text title : Vrittakusumarpanam a hymn to Vishnu and a guide to Sanskrit Metres

File name : vRRittakusumArpaNam.itx

Category : vishhnu, sAhitya

Location : doc_vishhnu

Author : G S S Murthy

Transliterated by : G S S Murthy

Proofread by : G S S Murthy

Latest update : January 30, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2023

*sanskritdocuments.org*

# વૃત્તકુસુમાર્પણમ્

Vritta Kusumarpanam, a hymn to Vishnu and
a guide to Sanskrit Metres by G S S Murthy

## પૂર્વાર્ધમ્

યોગમુદ્રામુપારૂઢં નરસિંહં હૃદિ સ્મરન્ । (અનુષ્ટુભ્)
વૃત્તલક્ષણજિજ્ઞાસુઃ નામસઙ્કીર્તનં હરેઃ ॥ ૧॥

કુર્વન્નાપ્નોત્વવગમં વૃત્તાનાં લક્ષણે જવાત્ ।
ઇતિ સઞ્ચિન્ત્ય યતતે કર્તુમેષાં કૃતિં હ્રિયા ॥ ૨॥

ગોરુરુગ્રામસઞ્જાતઃ શેલ્વપિલ્લૈસુતોઽલ્પધીઃ ।
મૂર્ત્યુપાહ્વઃ શ્રીનિવાસઃ સાવધાનં નિબોધત ॥ ૩॥

પ્રારમ્ભકાંશાઃ શાસ્ત્રસ્ય પૂર્વાર્ધેઽત્ર દર્શિતાઃ ।
હ્રસ્વાક્ષરોચ્ચારણાય યઃ કાલઃ સમપેક્ષિતઃ ॥ ૪॥

સ એકમાત્રામિત ઇત્યુચ્યતે પૂર્વસૂરિભિઃ ।
દીર્ઘાક્ષરમનુસ્વારવિસર્ગાન્તાક્ષરાણિ ચ ॥ ૫॥

માત્રાદ્વયમિતાનીતિ ચ્છન્દઃશાસ્ત્રે નિગદ્યતે ।
સંયુક્તાક્ષરપૃષ્ઠસ્થં દ્વિમાત્રમિતિ ગણ્યતે ॥ ૬॥

હ્રસ્વાક્ષરં ચેત્પાદાન્તે દ્વિમાત્રં તદપિ સ્મૃતમ્ ।
એકમાત્રામિતઃ કાલઃ લઘુરિત્યાદૃતૈર્બુધૈઃ ॥ ૭॥

દ્વિમાત્રાપ્રમિતસ્તાવદ્ગુરુરિત્યભિધીયતે ।
છન્દસાં લક્ષણં વક્તું સુકરં ભવતાદિતિ ॥ ૮॥

અક્ષરાણિ ત્રિશઃ પદ્યે ગુમ્ફિતાન્યાદિતઃ ક્રમાત્ ।
તમક્ષરગણં પ્રાહુઃ વૃન્દં ત્ર્યક્ષરસમ્મિતમ્ ॥ ૯॥

લઘ્વાદિર્યગણઃ પ્રોક્તઃ રગણઃ લઘુમધ્યમઃ ।
લઘ્વન્તસ્તગણશ્ચાથ ગુર્વાદિર્ભગણઃ સ્મૃતઃ ॥ ૧૦॥

ગુરુમધ્યસ્તુ જગણઃ ગુર્વન્તઃ સગણો ભવેત્ ।
નગણઃ સ્યાત્સર્વલઘુર્મગણો લઘુવર્જિતઃ ॥ ૧૧॥

યત્રાવશ્યો વિરામઃ સ્યાત્ પદ્યવાચનકર્મણિ ।
તત્સ્થાનં યતિમાહુઃ સા પાદાન્તે નિયતા ભવેત્ ॥ ૧૨॥

યતિસ્થાને પદાન્તસ્સ્યાદિતિચ્છન્દોવિદાં મતમ્ ।
પ્રદર્શ્યન્તેઽત્રોત્તરાર્ધે હૃદ્યવૃત્તાનિ કાનિચિત્ ॥ ૧૩॥

સમવૃત્તસ્યાદ્યપાદે દૃશ્યતે વૃત્તલક્ષણમ્ ।
યત્રાક્ષરગણસ્યાદ્યમક્ષરં ગણસૂચકમ્ ॥ ૧૪॥

“યશસ્વિન્” યગણં બ્રૂતે “રક્ષ માં” રગણં તથા ।
“તૃપ્તોઽસ્મિ” તગણં વક્તિ “સતતં” સગણં તથા ॥ ૧૫॥

ભગણં “ભાર્ગવ”પદં સૂચયત્યત્ર પશ્યત ।
“જયન્ત”પદમેવં હિ જગણં સૂચયેદિહ ॥ ૧૬॥

તથા “નિમિષ”શબ્દસ્તુ નિર્દિશેન્નગણં સ્તુતૌ ।
“માજાને” મગણં બ્રૂતે “હરે” લઘુગુરૂ તથા ॥ ૧૭॥

સ્તોત્રે “વિષ્ણો”ઽથવા “શૌરે” ગુરુદ્વન્દ્વે પ્રયુજ્યતે ।
પુનરુક્તિનિરોધાર્થં યુજ્યન્તેઽન્યપદાનિ ચ ॥ ૧૮॥

ક્વચિલ્લઘુગુરુદ્વન્દ્વં ગુરુદ્વન્દ્વં ગુરુ ક્વચિત્ ।
પૃથઙ્નિર્દિશ્યતે તત્ર હેતુર્યતિનિબન્ધનમ્ ॥ ૧૯॥

પદ્યોત્તરાર્ધે દત્તૌ સ્તઃ યતિર્વૃત્તસ્ય નામ ચ ।
ગુણાશ્ચ વસવશ્ચૈવ મુનયોઽન્યપદાનિ ચ । ૨૦॥

સઙ્ખ્યાવાચીનિ યુજ્યન્તે યતિનિર્દેશને ક્વચિત્ ।
ન સર્વેષાં તુ વૃત્તાનાં લક્ષણં દિશ્યતેઽધુના ॥ ૨૧॥

નિર્દિશેદન્યવૃત્તાનિ યથાનિર્દિષ્ટમઞ્જસા ।
બાલ એવ યથાશક્તિ ચ્છન્દોવ્યુત્પત્તિહેતુના ॥ ૨૨॥

## ઉત્તરાર્ધમ્

તૃપ્તોઽસ્મિ તુષ્ટોઽસ્મિ જયન્ત શૌરે (ઇન્દ્રવજ્રા)
ગોવિન્દ નારાયણ કૃષ્ણ વિષ્ણો ।
નામ્નેન્દ્રવજ્રેતિ વદન્તિ લોકે
છન્દોવિદો વૃત્તમિદં પ્રતીચ્છ ॥ ૨૩॥

જયન્ત તુષ્ટોઽસ્મિ જયેશ શૌરે (ઉપેન્દ્રવજ્રા)
રમેશ લક્ષ્મીશ મુકુન્દ વિષ્ણો ।
ઉપેન્દ્રવજ્રેતિ બુધૈઃ પ્રતીતં
સમર્પ્યતે પાદયુગે તવાત્ર ॥ ૨૪॥

શૌરે વિષ્ણો રામ હે રક્ષ શાર્ઙ્ગિન્ (શાલિની)
ત્રાતાસિ ત્વં મત્પ્રમાદાન્ ક્ષમસ્વ ।
ભિદ્યેતાદૌ દેવ વર્ણૈશ્ચતુર્ભિઃ
શાલિન્યાખ્યં વૃત્તમેતત્પ્રતીચ્છ ॥ ૨૫॥

રક્ષ માં નિમિષ રામ હે હરે (રથોદ્ધતા)
કૃષ્ણ શાર્ઙ્ગધર રાઘવ પ્રભો ।
આમનન્તિ કવયો રથોદ્ધતાં-
વૃત્તમેતદધુના સમર્પ્યતે ॥ ૨૬॥

રક્ષ માં નિમિષ ભાર્ગવ શૌરે (સ્વાગત)
રામ હે વરદ કેશવ કૃષ્ણ ।
સ્વાગતેતિ વિદિતં કવિવૃન્દે
સન્નિધૌ તવ સમર્પિતમદ્ય ॥ ૨૭॥

ભાર્ગવ ભાવન ભૂષણ શૌરે (દોધકમ્)
શ્રીધર કેશવ મોહનમૂર્તે ।
દોધકમેતદિતિપ્રથિતં ભોઃ
સ્વીકુરુ મામવ રાઘવ વિષ્ણો ॥ ૨૮॥

તૃપ્તોઽસ્મિ તુષ્ટોઽસ્મિ જયન્ત શૌરે (ઉપેન્દ્રવજ્રા)
જનેશ તોત્રાસ્ત્ર જયેશ વિષ્ણો ।
ઉપેન્દ્રવજ્રા ક્વચિદિન્દ્રવજ્રા
નામ્નોપજાતિઃ કૃપયા પ્રતીચ્છ ॥ ૨૯॥

ભાર્ગવ વિષ્ણો નિમિષ યશસ્વિન્ (મૌક્તિકમાલા)
ભૂષણ શૌરે દમય મમત્વમ્ ।
ભૂતયતિસ્સ્યાદિહ નરકારે
મૌક્તિકમાલાં વરદ ગૃહાણ ॥ ૩૦॥

રક્ષ માં નિમિષ જયન્ત વિષ્ણો (ચન્દ્રિકા)
પ્રત્યહં વિતર મનઃ પ્રશાન્તિમ્ ।
અક્ષરૈર્ભવતિ યતિસ્તુ ષડ્ભિઃ
ચન્દ્રિકાખ્યનવવૃત્તમવેહિ ॥ ૩૧॥

રક્ષ માં નિમિષ ભાર્ગવ શૌરે (નન્દન)
પુષ્કરાક્ષ મધુસૂદન કૃષ્ણ ।
નૂત્નવૃત્તમિહ નન્દનનામ
પ્રાર્થયે ભવતુ તેઽમિતભોગ્યમ્ ॥ ૩૨॥

જયન્ત તૃપ્તોઽસ્મિ જયેશ રામ હે (વંશસ્થમ્)
મુકુન્દ ગોવિન્દ રમેશ મધ્વરે ।
વદન્તિ વંશસ્થમિદં પુરાતનાઃ
સમર્પયામ્યત્ર તવાઙ્ઘ્રિપઙ્કજે ॥ ૩૩॥

સતતં સુમતે સદયં સહસે (તોટકમ્)
મમ મન્દમતિં મમ ધાર્ષ્ટ્યમહો ।
કથયન્તિ હિ તોટકમેતદિતિ
પ્રથિતાઃ કૃપયાનુગૃહાણ હરે ॥ ૩૪॥

નિમિષ ભાર્ગવ ભાવન રામ હે (દ્રુતવિલમ્બિતમ્)
વરદ કેશવ માધવ રક્ષ મામ્ ।
દ્રુતવિલમ્બિતમદ્ય મયાર્પિતં
સદયમદ્ય ગૃહાણ બલાનુજ ॥ ૩૫॥

તૃપ્તોઽસ્મિ તુષ્ટોઽસ્મિ જયન્ત રામ હે (ઇન્દ્રવંશા)
ગોવિન્દ લક્ષ્મીશ નમામિ મધ્વરે ।
ભક્ત્યેન્દ્રવંશાખ્યમિદં કૃતં મયા
સ્વીકૃત્ય માં પાહિ કૃપાપયોનિધે ॥ ૩૬॥

યશસ્વિન્ યથેષ્ટં યદીત્થં યતેઽહં (ભુજઙ્ગપ્રયાત)
કવિત્વે ક્ષમસ્વ પ્રભો વેઙ્કટેશ ।

ભુજઙ્ગપ્રયાતે મદીયં પ્રયાસં
    પ્રતીચ્છાત્ર દોષાનશેષાન્ક્ષમસ્વ ॥ ૩૭॥

નિમિષ યશસ્વિન્ નિયમ યતેઽહં (કુસુમવિચિત્રા)
    મમ કવિતાયા કુસુમમકિઞ્ચિત્ ।
તવ પદયુગ્મે સપદિ નિધાતું
    વિતરતુ તોષં કુસુમવિચિત્રા ॥ ૩૮॥

રામ હે રક્ષ માં રંહસા રાવિણં (સ્રગ્વિણી)
    કૃચ્છ્રગર્તે ગતં શ્રીનિધે મધ્વરે ।
પણ્ડિતા મણ્ડિતાઃ સ્રગ્વિણીં મન્વતે
    વૃત્તમેતત્પ્રભો સ્વીકુરુ પ્રાર્થયે ॥ ૩૯॥

સતતં ભાર્ગવ રક્ષ માં યશસ્વિન્ (મધુરા)
    સદયં સાન્ત્વય દુઃખિતં કૃપાલો ।
મધુરાખ્યં નવમર્પયામિ વૃત્તં
    યદિ હૃદ્યં ન ભવેત્તદા ક્ષમસ્વ ॥ ૪૦॥

માજાને નિમિષ જયન્ત રક્ષ માં ભોઃ (પ્રહર્ષિણી)
    કંસારે વરદ રમેશ રામ શૌરે ।
પ્રોક્તં યદ્ભુવનયતિઃ પ્રહર્ષિણીતિ
    પ્રેમ્ણા તે પદયુગલે સમર્પયામિ ॥ ૪૧॥

નિમિષ ભાર્ગવ જયન્ત જનેશ ભોઃ (મદનિકા)
    વરદ કેશવ રમેશ હરે પ્રભો ।
અભિનવં તવ પદેઽદ્ય નિવેશિતં
    મદનિકાખ્યમિહ વૃત્તમધોક્ષજ ॥ ૪૨॥

તૃપ્તોઽસ્મિ ભાર્ગવ જયન્ત જયેશ શૌરે (વસન્તતિલકા)
    ગોવિન્દ કેશવ રમેશ રથાઙ્ગપાણે ।
ખ્યાતં વસન્તતિલકેતિ કવિપ્રધાનૈઃ
    વૃત્તં ભવત્પદયુગેઽદ્ય સમર્પયામિ ॥ ૪૩॥

નિમિષ રામ વિષ્ણો રક્ષ માં રમ્યમૂર્તે (બદરિકાખ્ય)
    શમય કામબાધાં દુર્ભરાં સત્વરં મે ।
બદરિકાખ્યવૃત્તે સપ્તવર્ણૈર્યતિઃ સ્યાત્
    ઇદમપૂર્વમીશ પ્રાર્થયે સ્વીકુરુ ત્વમ્ ॥ ૪૪॥

નિમિષ નિયમ વિષ્ણો રક્ષ માં રામ શૌરે (માલિની)
વરદ સુખદ ભક્તં પશ્ય માં સત્યવાક્ય ।
યતિરિહ વસુસંજ્ઞા માલિનીતિ પ્રસિદ્ધં
તવપદયુગલેઽહં વૃત્તમાર્તોઽર્પયામિ ॥ ૪૫॥

યતેઽહં માજાને નિમિષ સતતં ભાર્ગવ હરે (શિખરિણી)
કવિત્વે વૈદુષ્યં ન મયિ સુતરાં યાદવપતે ।
યતિઃ ષડ્ભિર્વર્ણૈરિહ શિખરિણીવૃત્તમધુના
પ્રતીચ્છેદં વિષ્ણો પરિહર મદીયાનઘગણાન્ ॥ ૪૬॥

જગત્સુ સતતં હરે નિયમ રામ હે રક્ષકાઃ (પૃથ્વી)
ભવન્તિ ન ભવદ્વિધાઃ પ્રણતપાલને જાગરાઃ ।
રમેશ ભુવિ કથ્યતે બુધજનેષુ પૃથ્વીતિ યન્-
મયાત્ર હિ સમર્પ્યતે યતિરિહાષ્ટવર્ણૈઃ પ્રભો ॥ ૪૭॥

શૌરે વિષ્ણો શાર્ઙ્ગિન્ નિમિશ સુમતે ભૂષણ હરે (સંરમ્ભમ્)
દૃપ્તં મત્તં દુષ્ટં શમદ સુરુચે મામવ વિધો ।
વૃત્તં સંરમ્ભાખ્યં ઋતુયતિયુતં સ્વીકુરુ નવં
પ્રીત્યૈ ભૂયાત્તેઽદો વરદ કરુણાબ્ધે નરહરે ॥ ૪૮॥

વિષ્ણો શૌરે નિમિષ સતતં રક્ષ માં રામ દાસં (મન્દાક્રાન્તા)
પ્રહ્વં ભક્તં રઘુવર હરે દેવ કારુણ્યમૂર્તે ।
મન્દાક્રાન્તેત્યભિહિતમિદં વૃત્તમાસ્વાદ્યલાસ્યં
ત્વત્પાદાબ્જે મુનિયતિયુતં ન્યસ્ય શાન્તિં વ્રજામિ ॥ ૪૯॥

શૌરે વિષ્ણો યશસ્વિન્ નિમિષ સુમતે ભાર્ગવ હરે (મન્દાર)
પશ્ચાત્તાપાત્પ્રદગ્ધં વરદ કૃપયા પારય ભવાત્ ।
પ્રોક્તં મન્દારનામ્ના મુનિયતિયુતં સ્વીકુરુ નવં
ભૂયાત્તુભ્યં મુદાર્થં સહૃદયહિતં માધવ વિભો ॥ ૫૦॥

માજાને સતતં જડોઽસ્મિ સુમતેઽતૃપ્તોઽસ્મિ તપ્તોઽસ્મિભોઃ (શાર્દૂલવિક્રીડિત)
શાન્તિં દેહિ ભવત્કટાક્ષસલિલૈર્મદ્વિગ્રહં સ્નાપયન્ ।
વર્ણૈર્દ્વાદશભિર્યતિર્નિયમિતા શાર્દૂલવિક્રીડિતે
વૃત્તેઽસ્મિન્ ભવતે સમર્પિતમિદં લક્ષ્મીપ્રિય સ્વીકુરુ ॥ ૫૧॥

વિષ્ણો શૌરે યશસ્વિન્ નિયત નિયમ તે દેવ તૃપ્તોઽસ્મિ દાસઃ (સ્રગ્ધરા)

કંસારાતે વિધાતઃ મધુમથન હરે ચક્રપાણે દયાલો ।
યસ્મિન્ દ્વિઃ સ્યાન્મુનિયતિનિયમઃ સ્રગ્ધરેતીરિતે ભોઃ
તત્ત્વત્પ્રીત્યૈ કૃપાલો તવપદયુગલે સાદરં નિક્ષિપામિ ॥ ૫૨॥

સુમતે સતતં જયન્ત ભોઃ સદયં ભાવન રક્ષ માં હરે । (લલિતા)
લલિતેતિ બુધૈરુદાહૃતે તવ નેત્રદ્યુતિપાતમાદિશેઃ ॥ ૫૩॥

વરદ નિમિષ રક્ષ માં યશસ્વિન્ (પુષ્પિતાગ્રા)
નિયમ જયન્ત જનેશ રામભદ્ર ।
તવ પદયુગલે નિવેશ્ય ભક્ત્યા
દૃઢચરણાં પ્રણમામિ પુષ્પિતાગ્રામ્ ॥ ૫૪॥

વૃત્તકુસુમાનિ તવપદયુગલે ભક્ત્યા સમર્પિતાનિ હરે । (આર્યા)
સ્વીકુર્વકિઞ્ચનનૃણા સુરભિઃપ્રસરતુ તવ કરુણયા ॥ ૫૫॥

ઇતિ વૃત્તકુસુમાર્પણં સમાપ્તમ્ ।

Composed, encoded, proofread by
G S S Murthy murthygss at gmail.com

*Vritta Kusumarpanam*
pdf was typeset on January 30, 2023

Please send corrections to *sanskrit@cheerful.com*